Ramakrishnacharitam Gadyapadyatmakam

# રામકૃષ્ણચરિતમ્ ગદ્યપદ્યાત્મકમ્

## Document Information

Text title : Ramakrishnacharitam Gadyapadyatmakam

File name : rAmakRRiShNacharitamgadyapadyAtmakaM.itx

Category : vishhnu, vAsudevAnanda-sarasvatI, gadyam, krishna

Location : doc_vishhnu

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# રામકૃષ્ણચરિતમ્ ગદ્યપદ્યાત્મકમ્

પૃથિવીભરપરિહૃત્યૈ સુરવરસમ્પ્રાર્થિતોऽત્ર ભૂમિતલે ।
નૃરૂપેણ તમોનુદ્વંશે સકલોऽપ્યવાતરદ્વિમલે ॥ ૧॥

પિતૃબન્ધમોચકોऽભૂદ્યઃ સ્વોત્પત્ત્યા પ્રદર્શ્ય નિજરૂપમ્ ।
પ્રાક્સ્મૃત્યૈ સ પિતૃભ્યાં તદનુમતં સ્વીચકાર સદ્રૂપમ્ ॥ ૨॥

નીતા ગુરુણાન્યત્ર ચ દેવરિપૂન્હન્તુકામ એવ પુરા ।
સ્ત્રીવધરૂપાં ગણપતિપૂજાં ચક્રે બભૂવ સાऽપિ વરા ॥ ૩॥

શેષસહાયો હતવાનસુરાન્યજ્ઞદ્રુહો મહાવીરઃ ।
સ્વમતં તતાન યજ્ઞં દ્વિજદારાનુદ્દધાર વરધીરઃ ॥ ૪॥

(ગદ્યમ્)અથ સ ભગવાન્ ક્ષત્રરૂપેણાવતીર્ણસ્તમોऽનુત્કુલભૂષણો
વિપ્રવરેણ નીતો નિજપૂર્વપત્નીપરિણયં ચિકીર્ષુર્ન કેનાપ્યુત્થાપિતં
ન નમિતં ચ રાજાભિમાનચાપં લીલયૈવાદાય સહસૈવ બભઞ્જ ॥ ૫॥

કુમારશાપેન વૈકુણ્ઠાદપિ પતિતં નીચતાં ગતમાત્માનં વૃણાનં રાજાનં
સમાગતમાલોચ્ય પૂર્વં મ્લાયિતવદનાપિ પદ્મસદના હૃષ્ટવદના સતી
સ્વયમેવ સ્વપતિં વૃતવતી ॥ ૬॥

વવ્રે શ્રિયં સ વિજયશ્રિયા સ્વભાગં જહાર મૃગપ ઇવ ।
હૃષ્ટભ્રાતયુતઃ સ પ્રતસ્થ ઈશઃ પ્રભુઃ કૃતાર્થ ઇવ ॥ ૭॥

(ગદ્યમ્)અથ સસૈન્યકઃ સભ્રાતૃકઃ સપરિગ્રહો ભગવાન્ સ્વરાષ્ટ્રં
પ્રયાસ્યન્મેઘગમ્ભીરયા વાચા ગર્જન્તં પૃષ્ઠત આગતં દ્વિષન્તં નિર્જિત્ય
વિજયી સન્સ્વનગરં પ્રાવિશત્ ॥ ૮॥

ઈદૃગ્ગુણા યસ્ય ન વર્ણિતું યાન્ શેષોऽપિ શક્તઃ ક કથા પરેષામ્ ।
સ બદ્ધસેતુર્જિતદેવવૈરિર્નાથો રઘૂણામથવા યદૂનામ ॥ ૯॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીરામકૃષ્ણચરિતં સમ્પૂર્ણમ્ ।

*Ramakrishnacharitam Gadyapadyatmakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*